# Devaganaih Krita Girija Stuti

# દેવગણૈઃ કૃતા ગિરિજાસ્તુતિઃ

## Document Information

Text title : Devaganaih Krita Girija Stuti

File name : girijAstutiHdevagaNaiHkRRitA.itx

Category : devii, devI, stuti, shivarahasya, pArvatI

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 6| 5-56 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2023

*sanskritdocuments.org*

# દેવગણૈઃ કૃતા ગિરિજાસ્તુતિઃ

ગિરિરાજકુમારિકે શિવે ચરણં તે કમલામલં કથમ્ ।
ન નિરીક્ષિતમાદરેણ તત્ નિગમૈરપ્યવધારિતં ન હિ ॥ ૧॥

અધુના ચરણામ્બુજં શિવે યદિ તે દૃષ્ટિપથં પ્રયાસ્યતિ ।
કથમપ્યઘકોટિનાશકં સકલાભીષ્ટદમપ્યસંશયમ્ ॥ ૨॥

ન વિમાનમણિપ્રભાગણૈઃ કથમપ્યાદરતોઽપિ સર્વથા ।
નયનૈર્ન નિરીક્ષિતં તતઃ કથમસ્માકમુમે મતિર્ભવેત્ ॥ ૩॥

શફરીચટુલોલદૃષ્ટિભિઃ કથમપ્યમ્બ વિલોકયાશુ નઃ ।
યદિ તે કરુણારસાલયઃ સુવર્ગોઽપ્યપવર્ગસાધનમ્ ॥ ૪॥

અતિદીનદયાલુતા શિવે ત્વયિ વેદૈરપિ નિશ્ચિતા તતઃ ।
અતિદીનગણેષુ વાઽસુરાન્ ગણયિત્વા જગદમ્બ પાહિ નઃ ॥ ૫॥

કિમશક્યમિહામ્બ તે શિવે નહિ દીનોચ્ચવચઃ શ્રુતં ચ કિમ્ ।
અતિદૂરવિલોકનેઽપિ તે શ્રમ એવેતિ વિશેષતો મિતમ્ ॥ ૬॥

નિકટસ્થિતભક્તપાલનં કરુણાવીક્ષણદૃષ્ટિભિઃ શિવે ।
કથમપ્યનુવારમ્બિકે ન હિ તે કોઽપિ તથા ભવેચ્છ્રમઃ ॥ ૭॥

અધુના યદિ ગમ્યતે ત્વયા ત્રિદશાધીશ્વરશઙ્કરાલયઃ ।
નિલયઃ સુખસાગરસ્ય તે પુનરપ્યાગમનં કથં ભવેત્ ॥ ૮॥

ન વયં ગિરિરાજકન્યકે કરુણાપાત્રમિતિ પ્રમાઽપિ તે ।
પતિતાનપિ પાવયસ્યુમે પતિતેષ્વેવ સુરાન્ વિલોકય ॥ ૯॥

તવ દૃષ્ટિરદૃષ્ટતો ભવેદિતિ નિર્ણીતમતિપ્રયત્નતઃ ।
તપસાઽપિ ન તસ્ય સાધનં ભવતીતિ પ્રમિતં પ્રમાતૃભિઃ ॥ ૧૦॥

કિમહો ન દયા ગિરીન્દ્રજે દયનીયાઃ કતિ તે જગત્ત્રયે ।
નહિ તેષુ સુરાઃ પતન્તિ વા દુરદૃષ્ટં કિમિહામરેષ્વપિ ॥ ૧૧॥

શિવપૂજનસાધિતા પુરા સુરતા સા ન કથં મતા તવ ।
શિવપૂજકભક્તિરસ્તુ તે ત્વમુમે શઙ્કુરતત્પરા ખલુ ॥ ૧૨॥

તવ યદ્યપિ શઙ્કરે રતિઃ ત્વરયા ગન્તુમુમાર્ધવિગ્રહઃ ।
કથમદ્ય ભવિષ્યતીતિ સા ગિરિજે નૈવ હિ વિઘ્નિતા ભવેત્ ॥ ૧૩॥

અતિદીનસુરાનુપાલને ન ચ વિઘ્નોઽપિ પથિ પ્રિયાદરે ।
પરમાપદગાધસાગરે પતિતાનુદ્ધર સાદરં સુરાન્ ॥ ૧૪॥

યદિ ગૌરિ ભવેદુપેક્ષયા ગમનં તે હરમન્દિરં પ્રતિ ।
સ શિવોઽપિ કથં ન પૃચ્છતિ ત્રિદશાઃ કિં ન વિલોકિતા ઇતિ ॥ ૧૫॥

ગમનપ્રતિબન્ધકં ચ કિં ક્ષણમાત્રાનવલોકનેઽપિ તે ।
અતિદુઃખમહાબ્ધિમાલયા વલિતા એવ સુરાઃ શિવેન કિમ્ ॥ ૧૬॥

તવ દર્શનમાત્રતઃ શિવે દુરિતાબ્ધિઃ પ્રલયં પ્રયાસ્યતિ ।
સુખસાગરપઙ્ક્તિરાદરાત્ અનુયાત્યેવ શિવાર્ચકાલયમ્ ॥ ૧૭॥

ગિરિજે સ વદાન્યતામગાત્ ચરણસ્તેન ચ તન્નિરીક્ષણમ્ ।
અધુના સુખસાધનં શિવે ન તવાયાસલવોઽપિ સર્વથા ॥ ૧૮॥

તવ કલ્પતરુર્ન વામ્બિકે ન ચ ચિન્તામણિરદ્રિકન્યકે ।
સુરધેનુરિયં પરં ત્વહો ચરણઃ કોઽપિ સુધાઘનો ધનઃ ॥ ૧૯॥

સ સુધાઘનતામુપાગતઃ ચરણસ્તે સુરરૂપપાદપાન્ ।
અભિષિઞ્ચતુ દુઃખપાવકપ્રતિતપ્તાનધુના મુહુર્મુહૂઃ ॥ ૨૦॥

ક્વ સુધાઘનતા ક્વ ધીરતા સુરચિત્તામ્બુજપૂજનાર્હતા ।
ક્વ સુરાનવલોકનાદરઃ ચરણસ્યાસ્ય તવામ્બ શામ્ભવિ ॥ ૨૧॥ (ચરણસ્યાસ્યેતિ પૂર્વાર્ધેઽન્વેતિ નોત્તરાર્ધે)

કરુણાબ્ધિતરઙ્ગમાલયા લલિતં તે નયનામ્બુજં શિવે ।
તદિદં સુરવૃન્દમન્દિરે પ્રસરત્વાશુ સુખામ્બુધિપ્રદમ્ ॥ ૨૨॥

ગિરિજાનયનાવલોકનં સુરનારીસમપેક્ષિતં ક્ષણમ્ ।
કમલાપ્યનુવેલમમ્બિકા ચરણામ્ભોજરજઃપ્રસાદજા ॥ ૨૩॥

કમલા કમલૈરલં બલિં ગિરિજાપાદુકપૂજનપ્રિયા ।
પુરતઃ પુરતઃ પ્રસર્પતિ પ્રવહન્તી ગિરિજે વિલોકય ॥ ૨૪॥

કિમતઃ પરમસ્તિ વાઞ્છિત ગિરિજાપાદુકદર્શનં વિના ।
તદનન્તસુખપ્રદં શિવે ત્રિદશાનામપિ દુર્દશાપહમ્ ॥ ૨૫॥

ક્વ ચતુર્દશલોકનાથતા ક્વ કૃપાસાગરતા દયાર્દ્રતા ।
ક્વ નિરન્તરદીનબન્ધુતા ક્વ તવાદ્યાપ્યકૃપા સુરેષ્વપિ ॥ ૨૬॥

(ક્વ વદાન્યવદાન્યમાન્યતા ક્વ દયાતુઙ્ગતરઙ્ગલોલતા ।
ક્વ શિવાયકમાતૃતા શિવે ક્વ તવાદ્યાન્યકૃપા સુરેષ્વપિ ॥)
મનુજેષ્વપિ તે દયા શિવે ગુરુસંસારરતેષ્વનુક્ષણમ્ ।
ન વયં તદપેક્ષયા ક્ષતાઃ ક્ષણમપ્યમ્બ વિલોકયાશુ નઃ ॥ ૨૭॥

યદિ તે ચરણારવિન્દયોઃ પ્રભયાઽપિ પ્રભુભૂતયાઽનયો ।
ન વયં પરિતો વિભૂષિતાઃ કથમસ્માકમપીહ જીવનમ્ ॥ ૨૮॥

અમરાનવ શઙ્કરપ્રિયે કરુણાપાત્રમિતિ સ્મરામરાન્ ।
શરણં તવ પાદપઙ્કજં ન તદન્યચ્છરણં સુરપ્રિયમ્ ॥ ૨૯॥

વયમેવમુમાર્ધવિગ્રહં ગિરિજામપ્યભયાય સર્વદા ।
શરણં શરણાય કુર્મહે શરણં નાન્યદપેક્ષિત ખલુ ॥ ૩૦॥

અનુવારમુમાહરૌ પરં પ્રણતાઃ સ્મઃ સ્મરણૈરનુક્ષણમ્ ।
ગતકલ્મષરાશયઃ પુનઃ પ્રણતાઃ સ્મઃ પ્રણતાઃ પુનઃ પુનઃ ॥ ૩૧॥

યદિ દૈવતદૈવતં પ્રભું ભવમમ્બાં ભવભારભીરવઃ ।
ન વયં પ્રણતાઃ પુનઃ પુનઃ ન કૃતાન્તોઽપિ કિમત્ર નૃત્યતિ ॥ ૩૨॥

અમિતા પ્રભુતા તવામ્બિકે તવ યા સૈવ મહેશ્વરેઽપિ સા ।
ન તદન્યગતા તતઃ ક્વ વા શરણં નઃ શરણાર્થિનામપિ ॥ ૩૩॥

ન મહાપ્રભુસેવકાઃ પરં ભવદુઃખં ન ભવં પ્રપેદિરે ।
ન મૃગેન્દ્રગૃહેષુ કીકસાઃ કરિમુક્તાફલમન્યરેષ્વપિ ॥ ૩૪॥

યદિ તે ચરણારવિન્દયોઃ પ્રસવઃ કોઽપિ સમર્પિતસ્તદા ।
અધમોઽપિ નરો જગત્પતિઃ ભવતીત્યેવ વદન્તિ સાધવઃ ॥ ૩૫॥

અમરાનતિદીનવત્સલે ક્ષણમપ્યમ્બ વિલોકયાદરાત્ ।
કરુણારસસારધારયા દરસંસારદવાતુરાનુમે ॥ ૩૬॥

યદિ તે ન વિલોકનં તદા સુરતાયામપિ નાદરોઽસ્તિ નઃ ।
ન તયા ફલમસ્તિ કિં તયા ગિરિજે વન્ધ્યતનુસ્વરૂપયા ॥ ૩૭॥

તવ વા કિમુપેક્ષયા ફલં પ્રવિલાપોઽપિ ન નઃ શ્રુતસ્ત્વયા ।

અયિ માતરુમે કિમાસ્તિકેષ્વદયાકારણમસ્તિ શામ્ભવિ ॥ ૩૮॥

શિવ એવ દયાનિધિઃ શિવે તવ તાવત્કઠિનં મનો યતઃ ।
અધુનાઽપિ ન દીનવીક્ષણં ક્રિયતે સાદરમમ્બુજાનને ॥ ૩૯॥

સુતમપ્યપરાધસઙ્કુલં જનની પાલયતીતિ ન શ્રુતમ્ ।
કિસુમે વદ પાતકાનિ નઃ તવ નામસ્મરણેઽપ્યનુક્ષણમ્ ॥ ૪૦॥

બહુતૂલગિરિપ્રદાહકો દવલેશો ન શિવે તથૈનસામ્ ।
કુલમાશુ વિનાશમેત્યહો શિવનામસ્મરણાગ્નિલેશતઃ ॥ ૪૧॥

યદિ પાપવિનાશસાધનં શિવનામસ્મરણં ન શૈલજે ।
વદ તર્હિ કિમસ્તિ સાધનં વદ સત્યં વદ તદ્વિમર્શતઃ ॥ ૪૨॥

નિગમેષ્વઘનાશસાધનં શિવનામસ્મરણં પરં શ્રુતમ્ ।
તદિદં ન કથં વિનાશકં ત્રિવિધાઘૌઘકુલસ્ય શૈલજે ॥ ૪૩॥

સિતભૂતિવિભૂષણઃ શિવં યદિ તાવત્પ્રણતઃ સ્મરન્ મુદા ।
પ્રપતન્તિ મહાઘકોટયઃ પુનરુત્થાનવિવર્જિતાઃ પરમ્ ॥ ૪૪॥

વયમીશ્વરલિઙ્ગપૂજકાઃ ક્વ મહાપાતકમીતિરદ્રિજે ।
ન મહાનલસન્નિધિં ગતો હિમભીતઃ પતિતઃ પ્રધાવતિ ॥ ૪૫॥

ક્ષુધિતોપ્યમૃતાશનઃ પુમાન્ તૃષિતોઽપીતિ યથા તથા શિવે ।
શિવલિઙ્ગસમર્ચનપ્રિયઃ ન ચ દુઃખામ્બુનિધિ પ્રયાસ્યતિ ॥ ૪૬॥

ન ચ શઙ્કરપૂજકાર્ચકોઽપ્યઘલેશાશ્રયતામુપૈત્યતઃ ।
અઘસંશયવાર્તયાઽપિ વા ન વયં શૈલસુતે સમાવૃતાઃ ॥ ૪૭॥

કૃપયા પરયા શિવપ્રિયે ત્વરયા પશ્ય દયાસુધાકરાન્ ।
કુરુ કાપિ ન તાવતા ક્ષતિઃ ન સુધારશ્મિસમાનતા તવ ॥ ૪૮॥

ગિરિજે ન ચકોરરક્ષકઃ ક્ષણદાનાયક ઇત્યપિ શ્રુતઃ ।
ન હિ તેન સમેધિતસ્તથા કૃપયા પશ્ય સુરાન્ શિવપ્રિયે ॥ ૪૯॥

કિમનાથસનાથતાં ત્વયા ગિરિજે કર્તુમનુદ્યમઃ કૃતઃ ।
કિમનેન ફલં ફલાર્થિનાં કિમયં ધર્મ ઇતિ શ્રુતસ્ત્વયા ॥ ૫૦॥

ન ભવત્કૃપયા વિના ગતિઃ યદિ ગત્યન્તરમસ્તિ નઃ સદા ।
તવ માસ્તુ નિરીક્ષણં તતો ગતિહીનાનમરાનવામ્બિકે ॥ ૫૧॥

અસ્માકં શરણાગતામરશિરઃકોટીરહીરપ્રભા-
    પારાવારતરઙ્ગસઙ્ગતશિવાકાન્તાઙ્ઘ્રિપઙ્કેરુહે ।
પદ્માયલ્લકમલ્લચઞ્ચલતલે શ્રીચન્દનાપાદુકે
    દુષ્ટાનિષ્ટનિવારકે શરણમિત્યન્યં ન મન્યામહે ॥ ૫૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દેવગણૈઃ કૃતા ગિરિજાસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૬। ૫-૫૬ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 6. 5-56 ..

Proofread by Ruma Dewan

---

*Devaganaih Krita Girija Stuti*

pdf was typeset on May 7, 2023

Please send corrections to *sanskrit@cheerful.com*